# चिपिटकचर्वणे प्रतिपादितयोः प्रथयोः परिचयः

## <u>कोजागरे चिपिटकचर्वणम्</u>

मुख्यचान्द्रस्य आश्वयुजमासस्य पौर्णमासी तिथिः कोजागरी तिथिः उत कोजागरी पूर्णिमा इति ख्याता। अस्यां तिथौ देव्याः लक्ष्म्याः पूजनं कर्तव्यम् इति धर्मशास्त्रीयं विधानम्। तथा च धर्मसिन्धुग्रन्थे आश्विनपौर्णमासीतिथिकृत्यनिरूपणप्रसङ्गे उच्यते –

"आश्विनपौर्णमास्यां कोजागरव्रतम्। ... अत्र लक्ष्मीन्द्रयोः पूजनं जागरणम् अक्षक्रीडा च विहिता। ...

नारीकेरोदकं पीत्वा अक्षक्रीडां समारभेत्।

निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी।

तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः॥

नारीकेरोदकान् पृथुकांश्च देवेभ्यः पितृभ्यः समर्प्य बन्धुभिः सह स्वयं भक्षयते" इति।

रघुनन्दनभट्टाचार्यसङ्कलिते अष्टाविंशतितत्त्वे अपि तिथितत्त्वनामकाध्याये आश्विनपूर्णिमाकृत्यस्य निरूपणप्रसङ्गे इत्थं वर्णनं लभ्यते।

धर्मशास्त्रे स्पष्टतया एव उक्तं वर्तते यत् कोजागरव्रते लक्ष्मीन्द्रयोः पूजनं कृत्वा नारिकेलोदकं चिपिटकं च देवेभ्यः पितृभ्यः च निवेद्य परिवारजनैः सह भोक्तव्यम्। ततः अक्षक्रीडया रात्रिजागरणम् अपि विहितम्। तथा क्रियते चेत् निशीथे देवी लक्ष्मीः "को जागर्ति" इति कथयन्ती जाग्रते जनाय धनं प्रयच्छति। अस्मिन् प्रहसने अपि कोजागरे चिपिटकचर्वणम् इति यदुक्तम् तत्र तात्पर्यं तु उक्तरूपमेवेति शम्।

## नष्टचन्द्रदर्शनम्

भाद्रपदमासस्य उभयपक्षयोः चतुर्थ्यां तिथौ समुदितः चन्द्रः नष्टचन्द्रः इति कथ्यते। अस्य दर्शनम् अनर्थककलङ्काय भवति इति हि पौराणिकी प्रसिद्धिः। तत्र अपि भाद्रपदशुक्लचतुर्थ्यां चन्द्रदर्शने विशेषनिषेधः दृश्यते। सा तिथिः खलु गणेशचतुर्थीरूपेण पाल्यते भारतस्य प्रायः सर्वेषु अपि प्रान्तेषु।

कदाचित् कुबेरस्य निमन्त्रितः गणेशः कांश्चन मोदकान् आदाय तमसाच्छन्नेन मार्गेण कैलाशं प्रत्यावर्तते स्म। पथि चन्द्रालोके प्रकाशिते मार्गे कञ्चन सर्पं दृष्ट्वा भीतः मूषिकः तथा अधावत् येन गणेशः पथि पतितः। तं दृष्ट्वा चन्द्रः अहसत्। चन्द्रदेवः स्वस्य रूपेण दर्पं प्रकटयति स्म। कुपितः गणेशः चन्द्रस्य रूपदर्पं खण्डयितुं तं शशाप। गणेशः अवदत् यत्, चन्द्रस्य प्रकाशः नश्यति। गणेशस्य शापेन चन्द्रस्य प्रकाशः नष्टः। चराचरे अन्धकारः व्याप्तः। एतेन चन्द्रः देवाः च चिन्तिताः गणेशं प्रार्थितवन्तः। तदा गणेशः कृपापरवशः सन् प्रतिपक्षं चन्द्रस्य कलानां वृद्धिं क्षयं च व्यवस्थापितवान्। अन्यम् अपि शापं दत्तवान् यत्, यस्मात् चतुर्थ्यां गणेशस्य उपहासं कृतवान् चन्द्रः तस्मात् चतुर्थ्यां विशेषतः भाद्रपदचतुर्थ्यां चन्द्रस्य दर्शनं यः करिष्यति स मिथ्याकलङ्कभाग् भविष्यति।

गणेशस्य इमं शापं स्मरन्तः जनाः भाद्रपदचतुर्थ्यां चन्द्रं न अवलोकयन्ति। कथञ्चिद् यदि नष्टचन्द्रस्य दर्शनं क्रियते तदा अपि गणेशचतुर्थ्यां गणेशपूजनात् परं काञ्चन कथां श्रुत्वा कञ्चन मन्त्रं च पठित्वा तस्माद् दोषात् मुक्तिं प्राप्नुयुः इति पौराणिकी प्रसिद्धिः। अस्मिन् प्रहसने अपि रङ्गिणी कथयति यत् - “यदैव दैववशाद् भाद्रे मासि नष्टचन्द्रदर्शनं मे संघटितं तदैव आशङ्कितोऽयं मित्याकलङ्कारोपः” इति। अत्र नष्टचन्द्रदर्शनम् इति कथनेन उपरि व्याख्याता कथा एव प्रतिपादिता इति शम्।

पुनश्च, श्रीकृष्णस्य मित्रम् आसीत् सत्राचित्। स भगवतः मित्रस्य सकाशात् स्यमन्तकं नाम विशिष्टं मणिं प्राप्तवान्। तस्य प्रियमित्रं भगवान् श्रीकृष्णः कदाचित् इमं मणिं स्वल्पकालाय अयाचत. किन्तु स तस्मिन् मणौ तथा आसक्तः आसीत् यत् स तं मणिं दातुं निराकृतवान्।

कदाचित् तं मणिं स्वीकृत्य सत्राजितः भ्राता प्रसेनः तं मणिं धृत्वा मृगयार्थं वनं गतः। तत्र तं कश्चन सिंहः हत्वा मणिम् अपाहरत्। तं सिंहं जाम्बवान् हत्वा मणिं सिंहाद् अपाहरत्। तदा प्रसेनस्य मरणस्य तथा मणेः अपहरणस्य वार्ता ज्ञात्वा स श्रीकृष्णम् एव प्रसेनस्य हन्तारं मत्वा सर्वत्र श्रीकृष्णस्य कलङ्कम् उद्घोषयत्।

कलङ्कमोचनार्थं श्रीकृष्णः अरण्यं गत्वा जाम्बवन्तं पराजित्य मणिम् उद्धृत्य सत्राजिते प्रत्यर्पितवान्।

कदाचित् भाद्रपदशुक्लचतुर्थ्यां चन्द्रम् अपश्यत् श्रीकृष्णः। अतः तस्मिन् मिथ्याकलङ्कारोपः जातः इति पुराणे प्रतिपादितम्। तदा आरभ्य एतादृशदोषाद् मुक्तिं प्राप्तुम् कश्चन मन्त्रः पठनीयः इति प्रथा आरब्धा। स च मन्त्रः इत्थम् –

“सिंहः प्रसेनम् अवधीत् सिंहो जाम्बवता हतः।

सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः॥” इति।

वस्तुतः स्वस्य सम्पदि दर्पः, अन्यस्य विकृतशरीरादौ परिहासः त्याज्यः इति गणेशस्य चन्द्रशापे मुख्यं तत्त्वम्। चन्द्रः पूर्णिमायां पूर्णतां गतः अपि पुनः तस्य क्षयः भवति। एवं लौकिकी सम्पत् स्थिरा न भवति। अतः तां सम्पदम् आश्रित्य दर्पः न उचितः।

अन्यस्य सम्पदि अनर्थकलोभः न कर्तव्यः। तेन लोकः तस्मिन् कलङ्कम् आरोपयति इति द्वितीयायाः कथायाः मुख्या शिक्षा। इमां शिक्षां पुनः पुनः स्मारयितुम् एव एषा प्रथा परिपाल्यते इति शम्॥